षष्ठ्याः प्रयोजयति, दास्याः सदृशः, वृषल्याः सदृशः इति । अत्र दासीवृषलीशब्दयोरन्तोदात्तत्वाद् 'उदात्तयणो हल्पूर्वात्' (६.१.१७४/३७२०) इति विभक्तिरन्तोदात्ता । पितृप्रतिरूपः । मातृप्रतिरूपः । सादृश्ये इति किम्? परमसदृशः । उत्तमसदृशः । समासार्थोऽत्र पूज्यमानता न सादृश्यम् ॥

## द्विगौ प्रमाणे । (१२/३७४६)

द्विगावुत्तरपदे प्रमाणवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । प्राच्यसप्तशमः । गान्धारिसप्तशमः । सप्तशमाः प्रमाणमस्य इति मात्रचः उत्पन्नस्य 'प्रमाणे लः' (वा. ५५८) 'द्विगोर्नित्यम्' (वा. ५५९) इति लुक् । प्राच्यश्चासौ [1]सप्तशमश्च प्राच्यसप्तशमः । प्राच्यशब्दः आद्युदात्तः । गान्धारिशब्दः कर्दमादित्वादाद्युदात्तो मध्योदात्तो वा । द्विगौ इति किम् ? व्रीहिप्रस्थः । प्रमाणे इति किम् ? परमसप्तशमम् ॥

## गन्तव्यपण्य वाणिजे । (१३/३७४७)

वाणिजशब्दे उत्तरपदे तत्पुरुषे समासे गन्तव्यवाचि पण्यवाचि च पूर्वपदं प्रकृतिस्वरं भवति । मद्रवाणिजः । काश्मीरवाणिजः । गान्धारिवाणिजः । मद्रादिषु [2]गत्वा व्यवहरन्ति इत्यर्थः । सप्तमीसमासा एते । तत्र मद्रशब्दो रक्प्रत्ययान्तत्वादन्तोदात्तः । काश्मीरशब्दोऽपि पृषोदरादिषु मध्योदात्तः । गान्धारिशब्दः कर्दमादिषु पठ्यते, तत्र कर्दमादीनां च इति पक्षे आद्युदात्तो भवति, [3]द्वितीयो वा । पण्ये – गोवाणिजः । अश्ववाणिजः । गोशब्दोऽन्तोदात्तः । अश्वशब्दः आद्युदात्तः । गन्तव्यपण्यम् इति किम् ? परमवाणिजः । उत्तमवाणिजः ॥

## मात्रोपज्ञोपक्रमच्छाये नपुंसके । (१४/३७४८)

मात्रा उपज्ञा उपक्रम छाया [4]एतेषूत्तरपदेषु नपुंसकवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । भिक्षामात्रं [5]न ददाति याचितः । समुद्रमात्रं न सरोऽस्ति किंचन । मात्रशब्दो[6]ऽयं वृत्तिविषय एव तुल्यप्रमाणे वर्तते[7] । तत्र भिक्षायास्तुल्यप्रमाणम् इति अस्वपदविग्रहः षष्ठीसमासः । तत्र भिक्षाशब्दः 'गुरोश्च हलः' (३.३.१०३/३२८०) इत्यप्रत्ययान्तोऽन्तोदात्तः । समुद्रशब्दोऽपि फिषि 'पाटलापालङ्काम्बासागरार्थानाम्' (फि.सू. २) इत्यन्तोदात्त एव ।

उपज्ञा – पाणिनोपज्ञम् अकालकम् व्याकरणम् । व्याड्युपज्ञं दुष्करणम् । आपिशल्युपज्ञं गुरुलाघवम् । षष्ठीसमासा एते । तत्र पणिनोऽपत्यम् इत्यणन्तः [8]पाणिनशब्दः प्रत्ययस्वरेणान्तोदात्तः । व्याडिरिञन्तत्वादाद्युदात्तः । तद्वदापिशलिः ।

उपक्रम – आढ्योपक्रमम् [9]प्रासादः । दर्शनीयोपक्रमम् । सुकुमारोपक्रमम् । नन्दोपक्रमाणि [10]मानानि । एतेऽपि षष्ठीसमासा एव । तत्रैत्यैनं ध्यायन्ति इत्याढ्याः । 'घञर्थे कविधानम्' (वा. ३०६) इति कप्रत्ययः । आङ्पूर्वाद् ध्यायतेः पृषोदरादित्वाद्ध्यस्य ढत्वम् । तदयमाढ्यशब्दः थाथादिस्वरेण (६.२.१४४/३८७८) अन्तोदात्तः । दर्शनीयशब्दो रित्वादुपोत्तमोदात्तः । सुकुमारशब्दः 'नञ्सुभ्याम्' (६.२.१७२/३९०६) इत्यन्तोदात्तः । नन्दशब्दः पचाद्यचि व्युत्पादितः । उपज्ञोपक्रमान्तस्य तत्पुरुषस्य नपुंसकलिङ्गता 'उपज्ञोपक्रमं तदाद्याचिख्यासायाम्' (२.४.२१/८२४) इति ।

---

1. सप्तसप्तमः क.फ. 2. प्राप्ताः क, मद्रान् गत्वा ह. 3. द्वितीयस्य वा क. 4. एतेषु उपपदेषु फ. 5. न नास्ति क.फ. 6. अयं नास्ति फ. 7. च इत्यधिकम् फ. 8. पाणिनिशब्दः फ. 9. प्रासादः नास्ति फ. 10. नामानि क.